श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनीलकण्ठदीक्षितेन कृतिषु

# ॥ श्री रामायणसारसङ्ग्रह रघुवीरस्तवः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री रामायणसारसङ्ग्रह रघुवीरस्तवः ॥

वेधोवितीर्णविशदान्नविवर्ततां स्वा -
    मप्रस्मरन् रघुपते कुलतन्तुमस्य।
मन्ये ररक्षिथ विभीषणमप्रमत्तो
    निःशेषयन्नपि कुलं रजनीचराणाम् ॥ 1 ॥

यज्ञं ररक्षिथ मुनेर्यदि कौशिकस्य
    यज्ञात्मनस्तव तु तां विदुरात्मरक्षाम्।
कीर्तिं यदीच्छसि कृतार्थय मामनाथं
    काकुत्स्थ वीर करुणामसृणैरपाङ्गैः ॥ 2 ॥

आरोपितं प्रथममेव धनुः पुरारे -
    र्यन्निष्क्रयं निगमवाच उदाहरन्ति।
आप्तैव भूमितनयाप्यनपायिनी ते
    मानुष्यकाभिनयमात्रमिदं तदूहे ॥ 3 ॥

तेजोनिधौ त्वयि समुद्र इवोदबिन्दु -
    स्तेजो यदि स्वयमलीयत भार्गवस्य।
किं तावता त्वयि रघूद्वह पूर्णमासीत्
    किं त्वेष तापसवटुः कृपणो बभूव ॥ 4 ॥

राज्याभिषेचनविधिः शिरसि प्रसक्तः
    पित्राज्ञया परिहृतोऽप्यसकृत्त्वयायम्।
काकुत्स्थ पर्यवसितस्तव पादुकायां
    कीर्तिस्तु धीर इति पूरयति त्रिलोकीम् ॥ 5 ॥

आज्ञां गुरोरहृदयामपि साधयिष्यन्
    सत्यव्रतप्रियतया विपिनं गतस्त्वम्।
ब्रह्मार्पणोपहृतकर्मफलोऽपि लोकै -
    र्गृह्णीय नाहमिति किं मुनिमात्थ मिथ्या॥ 6॥

शत्रोः स्वसारमुपलब्धवतः स्फुटं प्राक्
    शङ्के तवाजनि कियानयमित्यवज्ञा।
नो चेच्चतुर्दशसहस्त्रिकया भटानां
    प्राप्तं द्विषं व्यजयथाः कथमेक एव॥ 7॥

नेतुस्तवापि जगतामभवत् कदाचि -
    न्नेता विराध इति नाथ यथा तथैव।
व्यामोहयन्नपि जगन्निजमायया त्वं
    व्यामोहितोऽसि हरिणेन हिरण्मयेन॥ 8॥

तत्तत्फलः स स विधिः सकलास्तु लोकाः
    स्वात्मानुचिन्तनवतः सुलभा भुवीति।
व्यक्तं जटायुषि चिराद्दिवमेव सर्वां
    काकुत्स्थ लब्धवति ते घटितामपाङ्गैः॥ 9॥

हत्वा कबन्धमटवीमभिपर्यटन् य -
    च्छ्रान्तः क्षुधा बुभुजिषे सदने शबर्याः।
त्वय्येकमात्रकबलार्पणजं फलं वा
    भुङ्क्तामियं कथमलं न जगन्ति यस्य॥ 10॥

मर्त्यात्मतामभिनिनीषसि चेत्तदस्तु
    मर्त्येषु किं भुवि न सन्ति परावरज्ञाः।
बोद्धुं स्वतोऽपि निलयं तदरेर्विनैव
    दैन्यं रघूद्वह कियत्कियदन्वकार्षीः॥ 11॥

एकेन सप्त च तरूनिषुणापविध्यन्
    पादाञ्चलेन दशयोजनमस्थि धून्वन्।
मथ्नन् सुतं सुरपतेरपि लीलयैव
    किं मन्यसे मनुजता प्रकटीकृतेति ॥ **12** ॥

प्रस्थापिता मृगयितुं रविजेन सीतां
    दूताः समं रघुकुलोद्वह यद्यपीमे।
भारस्तथापि निहितो भवताञ्जनेये
    कस्तां परां चितमवैतु परः शिवांशात् ॥ **13** ॥

दृष्ट्वाभिलप्य परितोष्य च सेवया त्वं
    नाबोधि यत्सुखमबोधि तदात्मतत्त्वम्।
यद्दर्शनोद्यमत एव हनूमता तां
    त्वत्तोऽपि सेव्यचरणां क्षितिजामुपासे ॥ **14** ॥

उत्तीर्य सिन्धुमुपलभ्य सुतामवन्याः
    निर्दग्धशात्रवपुरो निहतारिसैन्यः।
ब्रह्मास्त्रतोऽपि हनुमानभवन्न बद्धः
    किं विश्वमातृभजनात्परतोऽपि बन्धः ॥ **15** ॥

नित्यं सुषुप्तिषु परिष्वजसे न राम
    भूतानि किं निखिलभूतगुहाशयस्त्वम्।
आसाद्य तत्प्रकटमर्थमवाप कीर्ति -
    माचन्द्रतारविमलामनिलात्मजन्मा ॥ **16** ॥

सिन्धुं विशोषयितुमाददिषे किलेषुं
    प्रज्वालिते शयनवेश्मनि पावकेन।
कान्तासखः क्व विहरिष्यसि तात पश्चा -
    दित्थं हि नाम धिषणां जहति स्मरान्धाः ॥ **17** ॥

स्वैरं तरन्त इतरानपि तारयन्ति
    प्राञ्चस्त्रिलोकगुरवो गतशोकहर्षाः।
इत्याहुरागमविदो यदिदं त्वदीये
    सेतौ निरैक्षिषि चिराय महोपलेषु ॥ **18** ॥

त्वामेव नाथमुपयातवतोररातेः
    सोदर्ययोः सममविन्दत राज्यमेकः।
अन्या तु निष्करुणमेव विरूपितासी -
    दीदृग्विधानि हृदयानि महेश्वराणाम् ॥ **19** ॥

हस्ते विलग्नमपि रावणमाद्ययुद्धे
    देवो मुमोच दययेति परिष्टुवन्ति।
त्वां बालिशास्तनुभृतो न तु तेऽवयन्ति
    निःशेषराक्षसवधाभिनिवेशरौक्ष्यम् ॥ **20** ॥

नागास्त्रबन्धपरुषां स्मर नाथ वेलां
    कीदृग्व्यथा तव तदास कियद्विधेति।
नित्या दशा चलति सा भवबन्धतो मे
    ज्ञातव्यथे सकरुणे किमितो वदेयम् ॥ **21** ॥

सभ्रातृबान्धवसुतं सबलं सभृत्यं
    लङ्केश्वरं त्वयि जिघांसति लब्धबोधः।
आगः प्रमार्ष्टुमविचार्य वरार्पणोत्थं
    स्वास्त्रं गतस्तमवधीत्स्वयमेव वेधाः ॥ **22** ॥

अग्नौ विशेति शबरीशरभङ्गयोर्य -
    दाज्ञामदास्त्वमनिषिध्य गिरापि किञ्चित्।
दृष्टा ततो रघुपते दयिता त्वयापि
    ज्वालाकलापजटिलं ज्वलनं विशन्ती ॥ **23** ॥

अब्जैव सा प्रथमतो धरणेस्ततोऽभू -
ज्जाता ततो ज्वलनतोऽपि यतस्तदूहे।
सर्वागमान्तपरिघुष्टसदाख्यमूर्त -
भूतत्रयावतरणादभवत्सतीति ॥ **24** ॥

दत्तां पुरैव जनसंसदि पादुकायै
राज्यश्रियं पुनरुपेत्य यदग्रहीस्त्वम्।
दत्तापहाररसिकेन ततस्त्वयैषा
दत्तापि देहिषु मृषैव रघूद्वह श्रीः ॥ **25** ॥

दाता बभूविथ कपीन्द्रविभीषणाभ्यां
स्वं स्वं पदं त्वमनुमत्य यतस्ततोऽहम्।
मह्यं मदीयमपि तात्त्विकमेव रूपं
किञ्चित् प्रदर्श्य भज कीर्तिमिति स्तुवे त्वाम् ॥ **26** ॥

मिथ्यापवादकलयापि विहाय शुद्धः
सद्यः प्रियां सुदृढमात्मनि सम्प्ररूढे।
स्वामिन् जगज्जनयितृत्वमृषापवादे
स्वैरं प्रवर्तयसि किं भवमीदृशं नः ॥ **27** ॥

लङ्कारणोपहृतराक्षसराजकोऽसौ
विप्रार्भकं तु कमपि त्वयि लिप्समाने।
प्रातिस्विकं प्रतिनिधिं पुनराचकाङ्क्ष
कालस्तपस्विनमहो वृषलं कठोरः ॥ **28** ॥

प्रान्ते क्वचिद्धिमगिरेर्हिमवर्षदग्धे
प्राप्तं श्रमेण महता भरतेन राज्यम्।
पश्यन् भुवं च लवणस्य कनिष्ठलब्धां
सौमित्रिरैहत न राज्यकथां सुमेधाः ॥ **29** ॥

प्राचेतसग्रथितकाव्यनिवेद्यमान -
निःसीमभव्यचरितापि भवन्निदेशात्।
या प्रत्ययाय यतते स्म सतां समक्षं
साविन्दत प्रकृतिमेव सुता धरण्याः॥ **30** ॥

प्रस्थाप्य भूमितनयां परमं पदं प्राक्
सौमित्रिमप्यनुपदं भुजगावतारम्।
सद्यस्त्यजन्निव दिवं गमयन्नुपायात्
सज्जीचकर्थ शयनीयमिति प्रतीमः॥ **31** ॥

द्यौरर्पिता खगवराय महोपकर्त्रे
दत्तं पदं तदधिकं विषयाश्रितेभ्यः।
नामापि ते सकृदकीर्तयते तु मह्यं
सायुज्यमेव रघुपुङ्गव दातुमर्हम्॥ **32** ॥

सत्यप्रियाय शरणागतवत्सलाय
सर्वापदां प्रशमनाय सकृत्प्रपत्त्या।
श्रीरामनामपरिपूतजगत्त्रयाय
सीतासखाय पुरुषाय नमो नमस्ते॥ **33** ॥

॥ इति श्री रामायणसारसङ्ग्रह रघुवीरस्तवः समाप्तः॥